# Gayatri Ramayana

# ગાયત્રી રામાયણ

## Document Information

Text title : Gayatri Ramayana

File name : gAyatrI_raamAyaNa.itx

Category : devii, gAyatrI, stotra, devI, raama

Location : doc_devii

Author : Traditional

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Gayatri Mahavijnana -Pandit

Latest update : February 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Gayatri Ramayana

# ગાયત્રી રામાયણ

(ગાયત્રીમન્ત્ર અક્ષરાણાં(વર્ણાનાં) શ્રીમદ્ વાલ્મીકિરામાયણે પ્રદર્શિતાઃ)

તપસ્સ્વાધ્યાયનિરતં તપસ્વી વાગ્વિદાં વરમ્ ।
નારદં પરિપપ્રચ્છ વાલ્મીકિર્મુનિપુઙ્ગવમ્ ॥ બાલકાણ્ડ ૧.૦૧.૦૦૧॥ ૧॥

સ હત્વા રાક્ષસાન્સર્વાન્ યજ્ઞઘ્નાન્ રઘુનન્દનઃ ।
ઋષિભિઃ પૂજિતસ્તત્ર યથેન્દ્રો વિજયી પુરા ॥ બાલકાણ્ડ ૧.૦૩૦.૦૨૪॥ ૨॥

વિશ્વામિત્રઃ સરામસ્તુ શ્રુત્વા જનકભાષિતમ્ ।
વત્સ રામ ધનુઃ પશ્ય ઇતિ રાઘવમબ્રવીત્ ॥ બાલકાણ્ડ ૧.૦૬૭.૦૧૨॥ ૩॥

તુષ્ટાવાસ્ય તદા વંશં પ્રવિશ્ય ચ વિશામ્પતેઃ ।
શયનીયં નરેન્દ્રસ્ય તદાસાદ્ય વ્યતિષ્ઠત ॥ અયોધ્યાકાણ્ડ ૨.૦૧૫.૦૨૦॥ ૪॥

વનવાસં હિ સઙ્ખ્યાય વાસાંસ્યાભરણાનિ ચ ।
ભર્તારમનુગચ્છન્ત્યૈ સીતાયૈ શ્વશુરો દદૌ ॥ અયોધ્યાકાણ્ડ ૨.૦૪૦.૦૧૪॥ ૫॥

રાજા સત્યં ચ ધર્મશ્ચ રાજા કુલવતાં કુલમ્ ।
રાજા માતા પિતા ચૈવ રાજા હિતકરો નૃણામ્ ॥ અયોધ્યાકાણ્ડ ૨.૦૬૭.૦૩૪॥ ૬॥

નિરીક્ષ્ય સ મુહૂર્તં તુ દદર્શ ભરતો ગુરુમ્ ।
ઉટજે રામમાસીનં જટામણ્ડલધારિણમ્ ॥ અયોધ્યાકાણ્ડ ૨.૦૯૯.૦૨૫॥ ૭॥

યદિ બુદ્ધિઃ કૃતા દ્રષ્ટુમગસ્ત્યં તં મહામુનિમ્ ।
અદ્યૈવ ગમને બુદ્ધિં રોચયસ્વ મહામતે ॥ અરણ્યકાણ્ડ ૩.૦૧૧.૦૪૩॥ ૮॥

ભરતસ્યાર્યપુત્રસ્ય શ્વશ્રૂણાં મમ ચ પ્રભો ।
મૃગરૂપમિદં વ્યક્તં વિસ્મયં જનયિષ્યતિ ॥ અરણ્યકાણ્ડ ૩.૦૪૩.૦૧૮॥ ૯॥

ગચ્છ શીઘ્રમિતો રામ સુગ્રીવં તં મહાબલમ્ ।
વયસ્યં તં કુરુ ક્ષિપ્રમિતો ગત્વાઽદ્ય રાઘવ ॥ અરણ્યકાણ્ડ ૩.૦૭૨.૦૧૭॥ ૧૦॥

દેશકાલૌ ભજસ્વાદ્ય ક્ષમમાણઃ પ્રિયાપ્રિયે ।

સુખદુઃખસહઃ કાલે સુગ્રીવવશગો ભવ ॥ કિષ્કિન્ધાકાણ્ડ ૪.૦૨૨.૦૨૦ ॥ ૧૧ ॥

વન્દિતવ્યાસ્તતઃ સિદ્ધાસ્તપસા વીતકલ્મષાઃ ।
પ્રષ્ટવ્યા ચાપિ સીતાયાઃ પ્રવૃત્તિર્વિનયાન્વિતૈઃ ॥ કિષ્કિન્ધાકાણ્ડ ૪.૦૪૩.૦૩૩ ॥ ૧૨ ॥

સ નિર્જિત્ય પુરીં લઙ્કાં શ્રેષ્ઠાં તાં કામરૂપિણીમ્ ।
વિક્રમેણ મહાતેજા હનૂમાન્ કપિસત્તમઃ ॥ સુન્દરકાણ્ડ ૫.૦૪.૦૦૧ ॥ ૧૩ ॥

ધન્યા દેવાઃ સગન્ધર્વાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।
મમ પશ્યન્તિ યે વીરં રામં રાજીવલોચનમ્ ॥ સુન્દરકાણ્ડ ૫.૦૨૬.૦૪૧ ॥ ૧૪ ॥

મઙ્ગલાભિમુખી તસ્ય સા તદાસીન્મહાકપેઃ ।
ઉપતસ્થે વિશાલાક્ષી પ્રયતા હવ્યવાહનમ્ ॥ સુન્દરકાણ્ડ ૫.૦૫૩.૦૨૬ ॥ ૧૫ ॥

હિતં મહાર્થં મૃદુ હેતુસંહિતં વ્યતીતકાલાયતિસમ્પ્રતિક્ષમમ્ ।
નિશમ્ય તદ્વાક્યમુપસ્થિતજ્વરઃ પ્રસઙ્ગવાનુત્તરમેતદબ્રવીત્ ॥ ૬.૦૧૦.૦૨૭ ॥ ૧૬ ॥

ધર્માત્મા રક્ષસશ્રેષ્ઠઃ સમ્પ્રાપ્તોઽયં વિભીષણઃ ।
લઙ્કૈશ્વર્યમિદં શ્રીમાન્ધ્રુવં પ્રાપ્નોત્યકણ્ટકમ્ ॥ યુદ્ધકાણ્ડ ૬.૦૪૧.૦૬૮ ॥ ૧૭ ॥

યો વજ્રપાતાશનિસન્નિપાતાન્ન ચુક્ષુભે નાપિ ચચાલ રાજા ।
સ રામબાણાભિહતો ભૃશાર્તશ્ચચાલ ચાપં ચ મુમોચ વીરઃ ॥ યુદ્ધકાણ્ડ ૬.૦૫૯.૧૩૯ ॥ ૧૮ ॥

યસ્ય વિક્રમમાસાદ્ય રાક્ષસા નિધનં ગતાઃ ।
તં મન્યે રાઘવં વીરં નારાયણમનામયમ્ ॥ યુદ્ધકાણ્ડ ૬.૦૭૨.૦૧૧ ॥ ૧૯ ॥

ન તે દદૃશિરે રામં દહન્તમપિવાહિનીમ્ ।
મોહિતાઃ પરમાસ્ત્રેણ ગાન્ધર્વેણ મહાત્મના ॥ યુદ્ધકાણ્ડ ૬.૦૯૩.૦૨૬ ॥ ૨૦ ॥

પ્રણમ્ય દેવતાભ્યશ્ચ બ્રાહ્મણેભ્યશ્ચ મૈથિલી ।
બદ્ધાઞ્જલિપુટા ચેદમુવાચાગ્નિસમીપતઃ ॥ યુદ્ધકાણ્ડ ૬.૧૧૬.૦૨૪ ॥ ૨૧ ॥

ચલનાત્પર્વતસ્યૈવ ગણા દેવાશ્ચ કમ્પિતાઃ ।
ચચાલ પાર્વતી ચાપિ તદાશ્લિષ્ટા મહેશ્વરમ્ ॥ ઉત્તરકાણ્ડ ૭.૦૧૬.૦૨૬ ॥ ૨૨ ॥

દારાઃ પુત્રાઃ પુરં રાષ્ટ્રં ભોગાચ્છાદનભોજનમ્ ।
સર્વમેવાવિભક્તં નૌ ભવિષ્યતિ હરીશ્વર ॥ ઉત્તરકાણ્ડ ૭.૦૩૪.૦૪૧ ॥ ૨૩ ॥

યામેવ રાત્રિં શત્રુઘ્નઃ પર્ણશાલાં સમાવિશત્ ।
તામેવ રાત્રિં સીતાપિ પ્રસૂતા દારકદ્વયમ્ ॥ ઉત્તરકાણ્ડ ૭.૦૬૬.૦૦૧ ॥ ૨૪ ॥

ઇદં રામાયણં કૃત્સ્નં ગયત્રીબીજસંયુતમ્ ।
ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ॥

ઇતિ ગાયત્રીરામાયણં સમ્પૂર્ણમ્ ।

The numbers correspond to sarga.adhyAya.shloka.
This is referenced from Valmiki Ramayana. There is another one
referred to Sankshepa Ramayanam by Vidyaranya in rAmAyaNarahasyam.

Encoded and proofread by Sunder Hattangadi

---

*Gayatri Ramayana*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*